শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥ শ্রীমন্নারাযণীযে একষষ্টিতমং দশকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীমন্নারাযণীযে একষষ্টিতমং দশকম্ ॥

## যজ্ৱপত্ন্যুদ্ধরণৱর্ণনম্

ততশ্চ ৱৃন্দাৱনতোঽতিদূরতো
    ৱনং গতস্ত্ৱং খলু গোপগোকুলৈঃ।
হৃদন্তরে ভক্ততরদ্বিজাঙ্গনা -
    কদম্বকানুগ্রহণাগ্রহং ৱহন্ ॥ **61.1** ॥

ততো নিরীক্ষ্যাশরণে ৱনান্তরে
    কিশোরলোকং ক্ষুধিতং তৃষাকুলম্।
অদূরতো যজ্ঞপরান্ দ্বিজান্ প্রতি
    ৱ্যসর্জযো দীদিৱিযাচনায তান্ ॥ **61.2** ॥

গতেষ্ৱথো তেষ্ৱভিধায তেঽভিধাং
    কুমারকেষ্ৱোদনযাচিষু প্রভো।
শ্রুতিস্থিরা অপ্যভিনিন্যুরশ্রুতিং
    ন কিঞ্চিদূচুশ্চ মহীসুরোত্তমাঃ ॥ **61.3** ॥

অনাদরাৎ খিন্নধিযো হি বালকাঃ
    সমাযযুর্যুক্তমিদং হি যজ্ৱসু।
চিরাদভক্তাঃ খলু তে মহীসুরাঃ
    কথং হি ভক্তং ৎৱযি তৈঃ সমর্প্যতে ॥ **61.4** ॥

নিৱেদযধ্ৱং গৃহিণীজনায মাং
    দিশেযুরন্নং করুণাকুলা ইমাঃ।

ইতি স্মিতার্দ্রং ভৱতেরিতা গতা -
স্তে দারকা দারজনং যযাচিরে॥ **61.5**॥

গৃহীতনাম্নি ৎৱযি সম্ভ্রমাকুলা -
শ্চতুর্ৱিধং ভোজ্যরসং প্রগৃহ্য তাঃ।
চিরং ধৃতৎৱৎপ্রৱিলোকনাগ্রহাঃ
স্ৱকৈর্নিরুদ্ধা অপি তূর্ণমাযযুঃ॥ **61.6**॥

ৱিলোলপিঞ্ছং চিকুরে কপোলযোঃ
সমুল্লসৎকুণ্ডলমার্দ্রমীক্ষিতে।
নিধায বাহুং সুহৃদংসসীমনি
স্থিতং ভৱন্তং সমলোকযন্ত তাঃ॥ **61.7**॥

তদা চ কাচিত্ত্ৱদুপাগমোদ্যতা
গৃহীতহস্তা দযিতেন যজ্ৱনা।
তদৈৱ সঞ্চিন্ত্য ভৱন্তমঞ্জসা
ৱিৱেশ কৈৱল্যমহো কৃতিন্যসৌ॥ **61.8**॥

আদায ভোজ্যান্যনুগৃহ্য তাঃ পুন -
স্ত্ৱদঙ্গসঙ্গস্পৃহযোজ্ঝতীর্গৃহম্।
ৱিলোক্য যজ্ঞায ৱিসর্জযন্নিমা -
শ্চকর্থ ভর্তৄনপি তাস্ৱগর্হণান্॥ **61.9**॥

নিরূপ্য দোষং নিজমঙ্গনাজনে
ৱিলোক্য ভক্তিং চ পুনর্ৱিচারিভিঃ।
প্রবুদ্ধতত্ত্ৱৈস্ত্ৱমভিষ্টুতো দ্ৱিজৈ -
র্মরুৎপুরাধীশ নিরুন্ধি মে গদান্॥ **61.10**॥

॥ ইতি শ্রীমন্নারাযণীযে একষষ্টিতমং দশকং সমাপ্তম্॥